# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-८** **गुणाः - ७०**

**विषयः - वेदसंहिता** CE 3.6.12 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २६-०४-२०१६** **सन्दर्भग्रन्थः - वेदभाष्यभूमिकासंग्रहः**

---

**युनिट-१**

**प्रश्नः -१ निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या विधेया । ०८**

*(१) नास्त्येतद ब्राह्मणेन्यत्र लक्षणं विद्यतेऽथवा ।*
*नास्तीयन्तो वेदभाग इति क्लृप्तेरभावतः ॥*

*(२) नर्कसाम यजुषां लक्ष्म सां कर्यादिति शङ्किते ।*
*पादश्च गीतिः प्रश्लिष्ट पाठ इत्यस्य सङ्करः ॥*

*(३) सामर्वं प्रति मुख्यं स्याद् गुणो वा बाह्यपाठतः ।*
*मुख्यमभ्यसितुं पाठौ गुणो गीताक्षरैः स्तुतेः ॥*

**प्रश्नः -२ कस्यापि एकस्य वर्णनं वर्णयत । ०८**

*(१) साम्नां देवतास्तुतिहेतुत्ववर्णनम् ।* *(२) ऊहग्रन्थस्य पौरुषेयत्वापौरुषेयत्वविचारः ।*

**प्रश्नः -३ द्वयोः टिप्पणी कार्या । ०४**

*(१) मन्त्रलक्षणम् ।* *(२) सामशब्दस्य गानमात्रवाचित्वप्रतिपादनम् ।*

*(३) स्तोभस्य लक्षणनिर्देशः ।* *(४) इराशब्दस्य गानविधानम् ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तरं लिखत । ०५**

*(१) सामवेदभाष्यभूमिकायाः भाष्यकारस्य नाम किम् ?*

*(२) "मन्त्रब्राह्मणयोर्वेदानामधेयम्" कस्योक्तिः ?*

*(३) 'व्याप्तिः'-इत्यस्य अर्थं लिखतु ।*

*(४) 'इरापदं . . . . स्याद्' रिक्तस्थानपूर्तिं कुरु ।*

*(५) 'अतिव्याप्तिः'- इत्यस्य-अर्थं लिखतु ।*

*(६) कल्पसूत्रं कति विधम् ?*

*(७) 'स्तुतिर्नाम . . . . . . . वाक्यम्' रिक्तस्थानं पूरयतु ।*

**युनिट-२**

**प्रश्नः -५ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

*(१) यच्चित्रयायजेतेति तद्गुणो नाम वा भवेत् ।*
*चित्रस्त्रीत्वगुणौरूढे रग्निषोमीयके पशौ ॥*

*(२) असंजातविरोधोऽतस्तद्वशातुपसंहतेः ।*
*नयने सति वाक्येन धर्माणां वेदगामिता ॥*

*(३) एकस्तोमेऽन्यशब्दः स्यात् बहुस्तोमेऽपिवाऽग्रिमः ।*
*त्रिवृदन्येत्यर्थवादान् नान्यमात्रस्य सम्भवात् ॥*

**प्रश्नः -६ एकस्य समीक्षा कार्या ।** **०८**

*(१) स्वरसामविकारचिन्तनम् ।*

*(२) स्वदृक् शब्दस्य मीलनावधित्वकथनम् ।*

**प्रश्नः -७ कश्चिदेका टिप्पणी कार्या ।** **०२**

*(१) श्लोकादिसाम्ना आज्यपृष्ठादिस्तोत्रस्य समुच्चयनिर्णयः ।*

*(२) ब्रह्मसाम्नोविकल्पितत्वकथनम् ।*

**प्रश्नः -८ द्वयोः लघूत्तरौ देयौ ।** **०२**

*(१) "त्रिवृदग्निष्टुदग्निष्टोमः" कस्य ब्राह्मणस्योक्तिः ?*

*(२) "विश्वजित् सर्व पृष्ठो भवति" कस्य ब्राह्मणस्योक्तिः ?*

*(३) सामगानं कयारीत्या भवति ?*

## यूनिट-३

**प्रश्नः -९ द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या विधेया ।** **०८**

*(१) नतिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः ।*
*अथर्वमन्त्रसम्प्राप्त्या सर्वसिद्धिर्भविष्यति ॥*

*(२) विनापिविधिना दुष्ट लाभान्न हि तदर्थता ।*
*कल्व्यस्तु विधि सामर्थ्यात् स्वर्गो विश्वजिदादिवत् ॥*

*(३) अभिधाभावनामाहु रन्यामेवलिङ्गादयः ।*
*अर्थात्म भावनात्वन्या सर्वाख्यातेषु गम्यते ॥*

**प्रश्नः -१० एकस्य वर्णन कुरुत ।** **०८**

*(१) स्वाध्यायाध्ययनविधिविचारे प्राभाकरमतं सविस्तरमुपन्यस्य तस्य सप्रमाणं खण्डनं कुरुत ।*

*(२) 'अप्रमाण्यं स्वतः, प्रामाण्यं परतः' इति सौगतमतोपन्यासः ।*

**प्रश्नः -११ द्वयोः टिप्पणी कार्या ।** **०४**

*(१) पूर्वोक्तस्य सांख्यमतस्य समीक्षा ।*

*(२) अप्रामाण्यं चोभयमपि परत एवेति वदतां तार्किकाणां मतप्रतिपादनम् ।*

*(३) "अपौरुषेयवेदा" ग्रन्थानुरूपं निरूपणं कुरुत ।*

**प्रश्नः -१२ पञ्चानां लघूत्ताणि लिखन्तु ।** **०५**

*(१) 'शेषे यजुः शब्दः' कस्योक्तिः ?*

*(२) वेदैरशून्यस्त्रिभिरेति कस्य वचनम् ?*

*(३) 'त्र्य्याविद्ययेति ब्रूयात्' कस्य ब्राह्मणस्य सूत्रम् ?*

*(४) नतिथिर्न च . . . . . न ग्रहो . . . . . न च . . . . . . . ॥ पूर्ति कार्या ।*

*(५) वेदाः कति ?*

*(६) अध्ययनं कथं विधीयते ?*

*(७) अथर्ववेदभाष्यकारस्य नाम किम् ?*

---------------------